श्रीः

पितृ (मातृ)
प्रत्याब्दिक श्राद्धप्रयोगः
(आपस्तंबीयम्)

(अग्निसन्धान, समिदाधान, पुण्याहवाचन, दर्शतर्पण,
ब्रह्मयज्ञ प्रयोग सहितं)

Pulikkundram Vangeepuram
STHALASAYANAACHAARYA:
West Mambalam , Chennai - 600 033
Cell: 98406 74866 / 63740 23799

2021

Rs.100/-

श्रीः

पितृ (मातृ)
प्रत्याब्दिक श्राद्धप्रयोगः
(आपस्तंबीयम्)

(अग्निसन्धान, समिदाधान, पुण्याहवाचन, दर्शतर्पण,
ब्रह्मयज्ञ प्रयोग सहितं)

Pulikkundram Vangeepuram
STHALASAYANAACHAARYA:
West Mambalam , Chennai - 600 033
Cell: 98406 74866 / 63740 23799

2021

Rs.100/-

विषयसूचिका

संख्या	विषयः	पुटं
1.	श्राद्ध प्रयोगः	1-41
2.	अग्नि सन्धानं, औपासनम्	42-49
3.	समिदाधानम्	50-52
4.	पुण्याहवाचनम्	52-57
5.	दर्शादि तर्पणम्	58-64
6.	ब्रह्मयज्ञ क्रमः	65-66

D.T.P. Process by

S.Srinath CELL: 98406 94431

and

S. Ramanujan CELL: 9080305197

श्रीः

पुण्याहवाचनं, अग्निसन्धानं, औपासनं,(समिदाधानं) कृत्वा *माध्याह्निक, भगवदाराधन, वैश्वदेव, पञ्चमहायज्ञांश्च कृत्वा, ब्राह्मणेषु आगतेषु,* ***द्विः आचम्य,*** *पाणीपादौ प्रक्षाळ्य, त्रिभिः दर्भैः कृतं पवित्रं धृत्वा, तिलाक्षतान् गृहीत्वा, प्रणम्य, दक्षिणाभिमुखः स्थित्वा,*

प्राचीनावीती-.... गोत्रस्य (गोत्रायाः)...शर्मणः (नाम्न्याः) मम पितुः (मातुः) अद्य श्राद्धं भविष्यति (भवति) तत्र आहवनीयार्थे भवद्भिः प्रसादः करणीयः (करिष्यामः) -प्रतिवचनम्

ओं-समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपाद पांसवः ।।

उपवीती - अक्षतैः - देवेभ्यो नमः / **प्राचीनावीती** - तिलैः - वसुरुद्रादित्यस्वरूप अस्मत् पितृ , पितामह , प्रपितामहेभ्यो नमः (मातृपितामहिप्रपितामहीभ्यो नमः) /

उपवीती - अक्षतैः - श्राद्ध संरक्षक श्री महाविष्णवे नमः ।।

प्राचीनावीती - देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ।। (त्रिः)

उपवीती - प्रणम्य, प्राचीनावीती -' स्वामिनः! अस्मिन् दिवसे ...गोत्रं .. शर्माणं (मम) पितरं, ... गोत्रां.... नाम्नीं... (मातरं) उद्दिश्य प्रत्याब्दिकश्राद्धं कर्तुकामोऽस्मि;

*(यत्र यत्र आचमनं - पादौ आजन्वा - आजङ्घान्वा, हस्तौ आकूर्परं च प्रक्षाळ्य - आचामेत्)

अयं देशः कालश्च, अस्मिन् गेहे वर्तमानाः पकापक पदार्थाः श्राद्धार्हाः भूयासुः, इदं क्षेत्रं गयाक्षेत्रसदृशं भूयात् , मम पितरमुद्दिश्य (मातरमुद्दिश्य) प्रत्याब्दिक श्राद्धकरणे अधिकारसंपदस्तु इति च भवन्तो महान्तोऽनुगृह्णन्तु (तथास्तु ; अधिकार संपदस्तु - प्रतिवचनम्)

उपवीती (उदङ्मुखः) - **श्राद्धभूमिं गयां ध्यात्वा ध्यात्वा देवं गदाधरम्।**

प्राचीनावीती(दक्षिणामुखः)- **वस्वादींश्च पितॄन् ध्यात्वा ततः श्राद्धं प्रवर्तये ।।**
(प्रवर्तय - प्रतिवचनम् ।)

सङ्कल्पः

उपवीती - दर्भेष्वासीनः, दर्भान् धारयमाणः, त्रिः प्राणानायम्य, श्रीमान् ....

प्राचीनावीती - श्री गोविन्द गोविन्द गोविन्द .... पुण्यतिथौ ....गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धं करिष्ये । (कुरुष्व - प्रतिवचनम्)

उपवीती - 'भगवानेव स्वनियाम्य स्वरूपस्थिति प्रवृत्तिस्वशेषतैकरसेन मया स्वकीयैश्चोपकरणैः स्वाराधनैकप्रयोजनाय परमपुरुषः सर्वशेषी स्वशेषभूतमिदं पितुः (मातुः)प्रत्याब्दिक श्राद्धाख्यं कर्म स्वस्मै स्वप्रीतये स्वयमेव कारयति ।'

प्राचीनावीती - दक्षिणाभिमुखः - सव्यं जान्वाच्य

ये पार्थिवासः पितरो ये अन्तरिक्षे ये दिवि ये वा मृता बभूवुः ।
ते अस्मिन् यज्ञे समवयन्ताम् ।। (अस्तु समवयन्ताम् - प्रतिवचनम्)

अग्निप्रतिष्ठा

स्थण्डिलं कल्पयित्वा

प्राचीः पूर्वमुदक्सꣳस्थं दक्षिणारम्भमालिखेत् ।

अथोदीचीः पुरःसꣳस्थं पश्चिमारम्भमालिखेत् ।

अवाक्क्रोऽभ्युक्ष्य, तृणं निर्ऋत्यां निरस्य, अप उपस्पृश्य, भूर्भुवस्सुरोमिति अग्निं प्रतिष्ठाप्य, निधाय वह्निं, उत्सृज्यतेऽवोक्षणतोयशेषं, प्राक्तोयं अन्यत् निदधाति, उदग्वा । यथा बहिस्स्याच्च परिस्तराणाम् ।। अग्निमिध्वा, अग्नेरुत्तरतः प्रागादि अप्रदक्षिणं **परिस्तीर्य** । दक्षिणाग्रैः पित्र्येषु; दक्षिणान् अधरान्; उत्तरान् उत्तरान्; उत्तरेणाग्निं प्रागग्रान् दर्भान् संस्तीर्य, तदुत्तरतः प्रणीतासनं, ब्रह्म दक्षिणासनं, पात्र पश्चिमासनम् । **दर्वीं ,आज्यस्थाली , प्रोक्षणी, प्रणीतीं, इध्मं, (२०) इतर दर्वीं, हविःपात्रं, हविष्यपात्रं** च द्वंद्वं न्यञ्चि सादयित्वा । आयामतः परीमाणेन प्रोक्षणीः उत्पूय, पात्राणि उत्तानानि कृत्वा, विस्रस्य इध्मं सर्वाभिः प्रोक्षणीभिः अद्भिः त्रिः प्रोक्ष्य, प्रोक्षणीपात्रं पुनः पूरयित्वा, किञ्चित् दक्षिणतो निधाय, आयामपवित्रं प्रणीतिपात्रे निधाय, अद्भिः पूरयित्वा, त्रिरुत्पूय, समं प्राणैर्हृत्वा,उत्तरेणाग्निं दर्भेषु सादयित्वा, दर्भैः प्रच्छाद्य, पवित्रं आज्यस्थाल्यां निधाय/ **उपवीती** -ब्राह्मणं दक्षिणतो निषाद्य, ... श्राद्ध होमकर्मणि ब्राह्मणाय नमः, इदमासनं, इदमर्चनम्। **प्राचीनावीती** - आज्यस्थाल्यां आज्यं निरूप्य, उदीचः अङ्गारान् निरूह्य, तेष्वधिश्रित्य, ज्वलता तृणेन अवद्योत्य, द्वे दर्भाग्रे प्रच्छिद्य, प्रक्षाल्य प्रत्यस्य(आज्ये), तृणाभ्यां त्रिःपर्यग्नि कृत्वा, उदगुद्वास्य, अङ्गारान् अग्नौ

आवाहन, अग्नौकरणं, स्वधा निनयनं तथा ।

विकिरं, पिण्डदानञ्च सङ्कल्पे पञ्च वर्जयेत् ।।

प्रत्यूह्य,उदगग्राभ्यां पवित्राभ्यां **पुनराहारं** आज्यं त्रिः उत्पूय, पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य, प्रागग्रं अग्नौ प्रहरति ।। येन जुहोति, तदग्नौ प्रतितप्य, दर्भैः संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, निधाय, दर्भान् अद्भिः संस्पृश्य, अग्नौ प्रहरति । इध्ममादाय परिधीन् परिदधाति । स्थविष्ठो मध्यमः, अणीयान् द्राघीयान् दक्षिणार्ध्यः, अणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः, **उपवीती** - द्वे आघार समिधौ मध्यमं परिधिं उपस्पृश्य ऊर्ध्वे दक्षिणमुत्तरं आदधाति । **प्राचीनावीती** - तूष्णीं समन्तं अप्रदक्षिणं परिषिच्य, इध्मं आज्येन अभ्यज्य, " अस्मिन् मम पितुः (मातुः) प्रत्याब्दिक श्राद्धीय पार्वण होमकर्मणि ब्रह्मन् ! इध्मं (१५) आधास्ये "(आधत्स्व - प्रतिवचनम्) इध्ममाधाय - **उपवीती,** इध्ममूलं परामृश्य, अप उपस्पृश्य, प्रजापतिं मनसा ध्यायन् आघारावाघारयति । **इतरदर्व्यां** आज्यमादाय, वायव्यात् आग्नेयान्तं, (प्रजापतय इदं न मम), **प्रधानदर्व्यां** आज्यमादाय, निर्ऋत्या ईशानान्तं, (इन्द्राय इदं न मम) । उत्तर पूर्वे- **ओं अग्नये स्वाहा** (अग्नय इदं न मम)। दक्षिणपूर्वे **ओं सोमाय स्वाहा** (सोमाय इदं न मम)। अग्निमध्ये - **ओं अग्नये स्वाहा** (अग्नय इदं न मम) । **ओं भूर्भुवस्सुवस्स्वाहा** (प्रजापतय इदं न मम)।

विश्वेदेव आवाहनम्

अग्नेरुत्तरतः प्राग्ग्रेषु दर्भेषु -

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये अत्र विहिताश्श्राद्धे सावधाना भवन्तु ते ।।
विश्वेदेवाश्शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यविष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ।।

* आवाहन, अर्घ्य, संकल्प, पिण्डान्नत्याग तर्पणे ।

अक्ष्य्य, आसनयोः,पाद्ये - गोत्र नाम च कीर्तयेत् ।।

'... गोत्रस्य ....शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रव संज्ञिक विश्वान् देवान् आवाहयामि' (इति अक्षतैः आवाह्य) ''विश्वेषां देवानां इदमासनं, इदमर्चनम् '' । यवोदकमुत्सिच्य,

पितृ आवाहनम्

२. **प्राचीनावीती** - अग्नेर्दक्षिणतः दक्षिणाग्रं भुग्नं निक्षिप्य, ''पितृपितामहप्रपितामहान् (मातृपितामहिप्रपितामहीन्) आवाहयामि''

आयांत पितरस्सोम्या गंभीरैः पथिभिः पूर्व्यैः ।
प्रजामस्मभ्यं ददतो रयिञ्च दीर्घायुत्वं च शतशारदं च ।।

'... गोत्रस्य ....शर्मणः पितुः(मातुः)प्रत्याब्दिक श्राद्धे .... गोत्रान् .... शर्मणः वसुरुद्रादित्य स्वरूपान् (वसुरुद्रादित्यस्वरूपाः) अस्मत्पितृपितामहप्रपितामहान् आवाहयामि' इति तिलैः पितृतीर्थेन आवाह्य,

सकृदाच्छिन्नं बर्हिरूर्णामृदु । स्योनं पितृभ्यस्त्वा भराम्यहम् ।
अस्मिन्त्सीदन्तु मे पितरस्सोम्याः । पितामहाः प्रपितामहाश्चानुगैस्सह।।

''.. गोत्राणां... शर्मणां ...वसुरुद्रादित्यस्वरूपाणां अस्मत् पितृपितामहप्रपितामहानां इदमासनम्', इदमर्चनम्

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिसुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ।। (शु.य. २-३४) तिलोदकमुत्सिच्य।

विष्णोः आवाहनम्

उपवीती - अग्नेरुत्तरतः प्रागग्रान् दर्भान् संस्तीर्य

ओं सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ।।

'... गोत्रस्य ....शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे श्राद्धसंरक्षकं श्रीमहाविष्णुं आवाहयामि' इति अक्षतैः आवाह्य,

पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।।

श्री महाविष्णोः इदमासनं, इदमर्चनम्, यवोदकं उत्सिच्य,/

प्रधान होमः

प्राचीनावीती - **''उद्धियतां, अग्नौ च क्रियताम्''** इति पितृस्थान स्वामिने पृष्टे।(**काममुद्धियतां, कामं अग्नौ च क्रियताम्** - प्रतिवचनम्) उद्धृतान्नमग्नौ अधिश्रित्य - प्राचीनम् उदीचीनम् वा उद्धास्य,

चरु होमः (षडाहुतीः)

प्रतिष्ठितमभिघार्य - दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य -

(१) **यन्मे माता प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः पिता वृङ्क्तां, आभुरन्योवपद्यताम् ।। .... शर्मणे अस्मत् पित्रे स्वाहा ।।**

(अस्मत्पित्र इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

(२) यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः परितस्थुषीः । अद्भिर्विश्वस्य भुवनस्य रन्तरन्यं पितुर्दधे ॥ .... शर्मणे अस्मत् पित्रे स्वाहा ॥ (अस्मत्पित्र इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

(३) यन्मे पितामही प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः पितामहो वृङ्क्तां, आभुरन्योवपद्यताम् ॥ .... शर्मणे अस्मत् पितामहाय स्वाहा ॥ (अस्मत्पितामहाय इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

(४) अन्तर्दधे पर्वतैरन्तर्महा पृथिव्या । आभिर्दिग्भिरनन्ताभिरन्तरन्यं पितामहादधे ॥ .... शर्मणे अस्मत् पितामहाय स्वाहा ॥ (अस्मत् पितामहाय इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

(५) यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः प्रपितामहो वृङ्क्तां, आभुरन्योवपद्यताम् ॥ .... शर्मणे अस्मत् प्रपितामहाय स्वाहा ॥ (अस्मत् प्रपितामहाय इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

(६) अन्तर्दधे ऋतुभिरहोरात्रैश्च सन्धिभिः । अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहादधे ॥ ... शर्मणे अस्मत् प्रपितामहाय स्वाहा ॥ (अस्मत् प्रपितामहाय इदं न मम)

दर्व्यामुपस्तीर्य - द्विरवदाय (वत्सानां त्रिरवदाय), सकृदभिघार्य

उपवीती, स्विष्टकृदर्थं, हविः प्रत्यभिघार्य,

प्राचीनावीती - सकृदभिघार्य

ये चेह पितरो ये च नेह याꣳश्च विद्म याꣳ उ च न प्रविद्म । अग्ने तान्वेत्थ यदि ते जातवेदस्तयां प्रत्तꣳस्वधया मदन्तु स्वाहा ॥

('ज्ञाताज्ञातपितृभ्य इदं न मम',)

आज्याहुतयः

'स्वाहा पित्रे' इत्यादि षड्ज्याहुतीर्जुहोति ॥

१. ओं स्वाहा पित्रे । (पित्र इदं न मम)

२. ओं पित्रे स्वाहा । (पित्र इदं न मम)

३. ओं स्वाहा पित्रे । (पित्र इदं न मम)

४. ओं पित्रे स्वाहा । (पित्र इदं न मम)

५. ओं स्वधा स्वाहा । (पितृभ्य इदं न मम)

६. ओं अग्नये कव्यवाहनाय स्वधा स्वाहा ।(अग्ने कव्यवाहनाय इदं न मम) उपवीती - दर्व्यामुपस्तीर्य, उत्तरार्धात् सकृत् अवदाय (वत्साः द्विरवदाय), द्विरभिघार्य, 'ओं अग्नये स्विष्टकृते स्वाहा' । (अग्ने स्विष्टकृत इदं न मम) प्राचीनावीती - दर्व्यामुपस्तीर्य, हविष्यमादाय, अभिघार्य, "स्वाहा" इत्युत्तर भस्मनि अपोह्य जुहोति (हुतदेवताभ्य इदं न मम) परिध्यञ्जनम् - लेपकार्यं - आज्यस्थालीमुत्तरतः, प्रधानदर्वीं दक्षिणतः,

इतरदर्वी मध्ये, पात्रसादन प्रयुक्तान् दर्भान् आदाय (दर्व्यां अनक्ति) अग्रं/ (इतरस्यां) मध्यं/ (आज्यस्थाल्यां) मूलं / एवं त्रिरक्त्वा, एकदर्भं प्रज्ञातं निधाय, इतरान् प्रागग्रं अग्नौ प्रहरति (नात्यग्रं प्रहरेत्) आप उप स्पृश्य - तृण प्रहरः, निर्देशनं च, अग्नेः अभिमन्त्रणश्च, भूमौ निमार्ष्टिः, परिधि प्रहरः, मध्यमं प्रहृत्य, इतरौ प्रहरन्, दर्वीभ्यां आज्यं गृहीत्वा जुहुयात् (वसुभ्यो रुद्रेभ्य आदित्येभ्यः सश्स्रावभागेभ्य इदं न मम ।)

सर्वप्रायश्चित्ताहुतयः (१३ आहुतयः)

उपवीति – प्राणानायम्य, श्रीभगव.... प्रीत्यर्थं .... गोत्रस्य.... शर्मणः मम पितुः (.... गोत्रायाः .... नाम्न्याः (मातुः) /(प्रत्याब्दिक) श्राद्धहोमकर्मणि मध्ये संभावित मन्त्रतन्त्र स्वर वर्ण विधिविपर्यास - न्यूनातिरिक्त प्रायश्चित्तार्थं सर्वप्रायश्चिताहुतीः होष्यामि, प्राणायामञ्च करिष्ये' इति संकल्प्य

ओं भूर्भुवस्सुवस्स्वाहा ॥ (प्रजापतय इदं न मम) ॥१॥

ओं अनाज्ञातं यदाज्ञातम् । यज्ञस्य क्रियते मिथु ।
अग्ने तदस्य कल्पय । त्वꣳहि वेत्थ यथातथꣳ स्वाहा ॥ (अग्नय इदं) ॥२॥

ओं पुरुषसम्मितो यज्ञः । यज्ञः पुरुषसम्मितः । अग्ने तदस्य कल्पय।
त्वꣳहि वेत्थ यथातथꣳ स्वाहा ॥ (अग्नय इदं न मम) ॥ ३ ॥

ओं यत्पाकत्रा मनसा दीनदक्षान । यज्ञस्य मन्वते मर्तासः ।
अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवाꣳ ऋतुशो

यजाति स्वाहा ॥ (अग्नय इदं न मम) ॥ ४ ॥

ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽव यासिसीष्ठाः।
यजिष्ठो वह्नितमꣳशोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥
(अग्नीवरुणाभ्यां इदं न मम) ॥५॥

ओं सत्वन्नो अग्नेऽवमो भवोती नेदिष्ठे अस्या उषसो व्युष्टौ ।
अव यक्ष्वनो वरुणꣳ रराणो वीहि मृळीकꣳसुहवो न एधि स्वाहा ॥
(अग्नीवरुणाभ्यां इदं न मम) ॥ ६ ॥

आभिर्गीभिर्यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा
स्तोतृभ्यो महि गोत्रा रुजासि । भूयिष्ठभाजो अधं ते स्याम स्वाहा ।
(इन्द्राय हरिवत इदं न मम) ॥ ७ ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाꣳसुरे
स्वाहा ॥ (विष्णव इदं न मम) ॥ ८ ॥

ओं भूस्स्वाहा ॥ (अग्नय इदं न मम) ॥ ९ ॥

ओं भुवस्स्वाहा ॥ (वायव इदं न मम) ॥ १० ॥

ओꣳ सुवस्स्वाहा ॥ (सूर्याय इदं न मम) ॥ ११ ॥

ओं भूर्भुवस्सुवस्स्वाहा ॥ (प्रजापतय इदं न मम) ॥ १२ ॥

ओं विष्णवे स्वाहा ॥ (विष्णवे परमात्मन इदं न मम) ॥ १३ ॥

प्राणायामः । आज्यपात्रं, दर्व्यौ च उत्तरतो निधाय ।

प्राचीनावीती, तूष्णीं समन्तं **अप्रदक्षिणं** परिषिच्य, प्रणीतासु अप आनीय, अन्यज्जलं पूरयित्वा, प्राच्यां, दक्षिणायां, प्रतीच्यां, उदीच्यां, ऊर्ध्वायां, भूमौ, जलं निस्स्राव्य,

समुद्रं वः प्र हिणोमि स्वां योनिमपि गच्छत ।
अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥

स्व शिरसि प्रोक्ष्य,

उपवीती - ब्राह्मणाय नमः । तांबूल, दक्षिणां समर्पयामि, सर्वोपचारान् समर्पयामि-इति ब्राह्मणं संपूज्य, दर्भेण **ओं श्री विष्णवे स्वाहा** । (श्री विष्णवे परमात्मन इदं न मम) इति पूर्णाहुतिः

अग्नि उपस्थानम् (तिष्ठन्)

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

अग्नये नमः, 'मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते । प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ (प्रणम्य, अभिवाद्य,)

प्राचीनावीती - पिता पितामहश्चैव तथैव प्रपितामहः ।
मम तृप्तिं प्रयान्त्वद्य होमाप्यायितमूर्तयः ॥

'स्वामिनः! अद्यानुष्ठित मम पितुः (मातुः) प्रत्याब्दिक श्राद्ध पार्वण होमकर्माणि मन्त्रलोपे, क्रियालोपे, द्रव्यलोपे, नियमलोपे च सत्यपि सर्वं यथाशास्त्रानुष्ठितं भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु'। (''तथाऽस्तु'', यथाशास्त्रानुष्ठितं अस्तु/इति प्रतिवचनम्/ ॥)

नियोग कालः

उपवीती – विश्वेदेवहस्ते, अपः प्रदाय, **''.... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां इदमासनम्''** ॥ पुनरपः प्रदाय, ...गोत्रस्य.... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) **प्रत्याब्दिक श्राद्धे विश्वेदेवार्थे भवता क्षणः कर्तव्यः** (ओं तथा - प्रतिवचनम्) **'प्राप्नोतु भवान्'** , **('प्राप्नवानि'** इति प्रतिवचनम्)। अलङ्कारार्थे इमे अक्षताः - सकलाराधनैः स्वर्चितम् ॥ **प्राचीनावीती** - पितृहस्ते अपःप्रदाय, **''.... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप अस्मत् पितृपितामहप्रपितामहानां (मातृपितामहिप्रपितामहीनां) इदमासनम्''** पुनरपः प्रदाय, ...गोत्रस्य.... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) **प्रत्याब्दिक श्राद्धे पितृपितामहप्रपितामहार्थे (मातृपितामहिप्रपितामह्यर्थे) भवता क्षणः कर्तव्यः** (ओं तथा - प्रतिवचनम्) **'प्राप्नोतु भवान्', 'प्राप्नवानि'** (इति प्रतिवचनम्)। अलङ्कारार्थे इमे तिलाः - सकलाराधनैः स्वर्चितम्॥ **उपवीती** - विष्ण्वर्थे अपः प्रदाय, **''.... गोत्रस्य .... शर्मणः पितुः (.... गोत्रायाः .... नाम्न्याः मम मातुः)प्रत्याब्दिक श्राद्धे श्राद्ध संरक्षक श्रीमहाविष्णोः इदमासनम्''** पुनरपः प्रदाय, ...गोत्रस्य.... शर्मणः पितुः **(.... गोत्रायाः .... नाम्न्याः मम मातुः) प्रत्याब्दिक श्राद्धे श्राद्ध संरक्षक श्रीमहाविष्णो! भवता क्षणः कर्तव्यः** (ओं तथा - प्रतिवचनम्) **'प्राप्नोतु भवान्'** , **('प्राप्नवानि'** इति प्रतिवचनम्)। अलङ्कारार्थे इमे अक्षताः - सकलाराधनैः स्वर्चितम् ॥

पादप्रक्षाळनम्

....गोत्रस्य.... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रव संज्ञकानां **विश्वेषां देवानां** पाद्यस्थाने **इदमासनम्** - इति **चतुरश्रमण्डले** उत्तराग्रं दर्भद्वयं संस्तीर्य, **इदमर्चनम्** - इति अक्षतान् निक्षिप्य,/ **प्राचीनावीती** - ....गोत्रस्य.... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप अस्मत् **पितृपितामह प्रपितामहानां** (मातृपितामहिप्रपितामहीनां) पाद्यस्थाने **इदमासनम्** - इति दर्भं **वर्तुलाकार** मण्डले दक्षिणाग्रं भुग्नं निक्षिप्य, **इदमर्चनम्** - इति तिलं निक्षिप्य। **उपवीती** - ....गोत्रस्य.... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे श्राद्ध संरक्षक **श्रीमहाविष्णोः** पाद्यस्थाने **इदन्ते आसनम्** - इति देवार्थ मण्डले उत्तराग्रं दर्भद्वयं निक्षिप्य, **इदमर्चनम्** । इति अक्षतान् निक्षिप्य ।

....गोत्रस्य..... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरव आर्द्रव सांज्ञक **विश्वेदेवाः! स्वागतम्, इदं वःपाद्यं,** - (इति साक्षत कुशाग्र तीर्थाञ्जलिं विसृज्य), **इदमर्घ्यं, शुक्रमसि ज्योतिरसि तेजोऽसि । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।** इति पादौ अवभ्यज्य, प्रक्षाळ्य, हस्ते जलं दत्वा ॥

प्राचीनावीती - ....गोत्रस्य..... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप अस्मत्

पितृपितामहाप्रपितामहाः! (मातृपितामह्यिप्रपितामह्याः!) **स्वागतम्,** इति तिलोदकम् निस्साव्य इदं वःपाद्यं, - (इति साक्षत कुशाग्र तीर्थाञ्जलिं विसृज्य), **इदमर्घ्यं । शुक्रमसि ज्योतिरसि तेजोऽसि । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।**

ओं-समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपाद पांसवः ।।

इति **पादौ अवभ्यज्य,** प्रक्षाळ्य, हस्ते जलं दत्वा ॥

उपवीती - ....गोत्रस्य..... शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे श्राद्ध संरक्षक श्रीमहाविष्णो! **स्वागतम्,** इदं ते पाद्यं, - इति इदमर्घ्यं, **तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवाꣳसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥ शुक्रमसि, ज्योतिरसि, तेजोऽसि । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।** इति पादौ अवभ्यज्य, प्रक्षाळ्य, हस्ते जलं दत्वा, **आचामेत्** । अनन्तरं **भोक्तारः आचमनं** कुर्युः ॥

प्राचीनावीती - तिलाक्षत तीर्थेन स्थान **प्रोक्षण** मंत्रः -

अपहता असुरा रक्षाꣳसि पिशाचा ये क्षयन्ति पृथिवीमनु ।
अन्यत्रेतो गच्छन्तु यत्रैषां गतं मनः ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्तेनोवन्तु पितरो हवेषु ॥

इति भुक्तिदेशे तिलान् सिकतांश्च प्रकीर्य -

अपवित्रःपवित्रो वा सर्वावस्थां गतोऽपि वा ।
यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

इति भोजन स्थानं प्रोक्ष्य ।

उपवीती - वैश्वदेविकहस्ते अपःप्रदाय, '.. गोत्रस्य ...शर्मणः (.... गोत्रायाः .... नाम्न्याः)..... पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रसंज्ञकानां विश्वेषां देवानां **भोजनस्थाने इदमासनम्**'' पुनरपःप्रदाय, इदं **भोजनपात्रासनं** ।

अर्चत प्रार्चत प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥ (ऋ. ८-६९-८)

***'इदं वो अर्चनं'** इत्यक्षताः

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

... गोत्रस्य ... शर्मणः ममः पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रव संज्ञकाः विश्वेदेवाः ! देहालङ्करणार्थे यथाभागशः अमीवो **गन्धाः** (सुगन्धाः - प्रतिवचनं)

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
हृदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥ (ऋ-१०-१४२-८)

*(देवानां दक्षिणपादे,सव्यपादे, दक्षिणजानुनि, सव्यजानुनि, दक्षिणांसे, सव्यांसे, मूर्ध्नि च, क्रमेण अर्चयेत् ।)

इमानि पुष्पाणि, श्री तुळसी दळानि च,

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं
धूर्व यं वयं धूर्वामस्त्वं देवानामसि ॥

उदकेन सङ्कल्पितोऽयं घ्राणतृप्त्यर्थं अयं वो **धूपः**।

उद्दीप्यस्व जातवेदोपघ्नन् निर्ऋतिं मम ।
पशूꣳश्च मह्यमावह जीवनञ्च दिशो दश ॥
मा नो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

'अवलोकनार्थं अयं वो **दीपः, ज्वाला भेदेन सूर्योज्योतिः**'

युवा सुवासाः परीवीत आगात् । स उ श्रेयान्भवति जायमानः।
तं धीरासः कवय उन्नयन्ति । स्वाधियो मनसा देवयन्तः ॥

आच्छादनार्थं, उत्तरीयार्थं **इदं वस्त्र युग्मं,** (वस्त्राभावे इमे दर्भाः) पवित्रार्थं **उभौ दर्भौ** । 'शेषोपचारार्थे इमे **अक्षताः**' । सकलाराधनैः स्वर्चितम् ॥

प्राचीनावीती - पितृहस्ते अपः प्रदाय, ...गोत्रस्य (...गोत्रायाः) ...शर्मणः (...नाम्न्याः) वसुरुद्रादित्य स्वरूपाणां अस्मत् पितृपितामह प्रपितामहानां (मातृपितामहिप्रपितामहीनां) **भोजनस्थाने इदमासनम्**'' * इति आसनार्थं सयवं ऋजुदर्भद्वयं दत्वा, पुनरपः प्रदाय, इदं भोजन पात्रासनं, सव्येन अभिमृश्य दक्षिणेन ब्राह्मणजानु अवलंब्य '**आस्यतां**' इत्युक्त्वा उपवेशयेत्।

अर्चत प्रार्चत प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥ (ऋ. ८-६९-८)

* (देवान् प्राङ्मुखान्, पितॄन् उदङ्मुखान् प्रागपवर्गान् दक्षिणापवर्गान् वा उपवेशयेत्, आचारात् ॥ विष्णुः सर्वतोमुखः, प्रत्यङ्मुखो वा)

इति मन्त्रेण 'इदं वो अर्चनं' ।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

"... गोत्रस्य ... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप पितृपितामहप्रपितामहाः! (मातृपितामहिप्रपितामह्यः!) यथाभागशः अमी वो गन्धाः " इति दद्यात् ।

आर्यने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
हृदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ।। (ऋ-१०-१४२-८)

'इमानि पुष्पाणि, श्रीतुळसीदळानि च' इति दद्यात् ।।

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं
धूर्व यं वयं धूर्वामस्त्वं देवानामसि ।।घ्राणतृप्त्यर्थं अयं वो **धूपः**।

उद्दीप्यस्व जातवेदोपघ्नन् निर्ऋतिं मम ।
पशूꣳश्च मह्यमावह जीवनञ्च दिशो दश ।।

'अवलोकनार्थं अयं वो **दीपः**' **ज्वाला भेदेन सूर्योज्योतिः**'

युवा सुवासाः परीवीत आगात् । स उ श्रेयान्भवति जायमानः।
तं धीरासः कवय उन्नयन्ति । स्वाधियो मनसा देवयन्तः ।।

आच्छादनार्थं **इदं वस्त्रयुग्मं** (अभावे यज्ञोपवीतं, दर्भान् वा) पवित्रार्थं **उभौ दर्भौ** । 'शेषोपचारार्थे इमे **तिलाः**' ।। सकलाराधनैः स्वर्चितम् ।

(देवब्राह्मणोपचारं सर्वमुदङ्मुखः कुर्यात् । पित्र्यं दक्षिणामुखः कुर्यात् ।)

उपवीती - विष्णुहस्ते जलं दत्वा, श्राद्ध संरक्षक महाविष्णोः **भोजनस्थाने इदमासनम्**'' पुनरपः प्रदाय, इदं भोजन पात्रासनं ।

अर्चत प्रार्चत प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ।। (ऋ. ८-६९-८)

'इदं ते अर्चनं'

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

"... गोत्रस्य ... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्ध संरक्षक महाविष्णो ! इदं ते गन्धाः " इति दद्यात् ।

आर्यने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
हृदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ।। (ऋ-१०-१४२-८)

'इमानि पुष्पाणि, श्रीतुळसीदळानि च' इति दद्यात् ।।

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं
धूर्व यं वयं धूर्वामस्त्वं देवानामसि ।।घ्राणतृप्त्यर्थं इदं ते **धूपः**।

उद्दीप्यस्व जातवेदोपघ्नन् निर्ऋतिं मम ।
पशूꣳश्च मह्यमावह जीवनञ्च दिशो दश ।।

'अवलोकनार्थं इदं ते **दीपः**' ' **ज्वाला भेदेन सूर्योज्योतिः**'

(देवब्राह्मणोपचारं सर्वमुदङ्मुखः कुर्यात् । पित्र्यं दक्षिणामुखः कुर्यात् ।)

युवा॑ सु॒वासा॒: परि॑वीत॒ आगा॑त्। स उ॒ श्रेया॑न्भवति॒ जाय॑मानः।
तं धीरा॑सः क॒वय॒ उन्न॑यन्ति। स्वा॒धियो॒ मन॑सा देव॒यन्त॑: ॥

आच्छादनार्थं **इदं वस्त्रं** (अभावे यज्ञोपवीतं, दर्भान् वा) पवित्रार्थं **उभौ दर्भौ**।
'शेषोपचारार्थे इमे **अक्षताः**' ॥ सकलाराधनैः स्वर्चितम् ॥

आचमनं,। घृतेन पात्रशुद्धिः ।
अन्नञ्च पायसं भक्ष्यं व्यञ्जनं घृतसूपकं। इति क्रमेण परिवेषयेत् ।

प्राचीनावीती - अन्न संरक्षणार्थं **राक्षोघ्न मंत्रपठनं** करिष्ये ।

ओं । सह॒ वै दे॒वाना॑ं चासु॒राणां च य॒ज्ञौ प्र॑त॒तावास्तां॑ व॒य॑ꣳस्व॒र्गं लो॒कमै॒ष्यामो॒ व्यमै॒ष्याम इति॑ तेऽसु॒रास्सन्न॑ह्य॒ सह॑सैवाचर॒न्ब्रह्म॑चर्येण॒ तप॑सैव दे॒वास्तेऽसु॑रा अमु॒ह्य॑ꣳस्ते न प्राजा॑न॒ꣳस्ते परा॑भवन्ते न स्व॒र्गं लो॒कमा॑यन्प्रसृ॒तेन॑ वै य॒ज्ञेन॑ दे॒वाः स्व॒र्गं लो॒कमा॑यन्प्रसृ॒तेना॑सु॒रान्परा॑ भावयन्प्रसृ॒तो ह॒ वै य॑ज्ञोपवी॒तिनौ॑ य॒ज्ञोऽप्र॑सृतोऽनुपवी॒तिनो॒ यत्किञ्च॑ ब्राह्म॒णो य॑ज्ञोपवी॒त्यधी॑ते यज॑त॒ एव तत्तस्मा॑द्यज्ञोपवी॒त्येवाधी॑यीत याजये॒द्यजे॑त॒ वा य॒ज्ञस्य॒ प्रसृ॑त्या अजि॑नं॒ वासो॑ वा दक्षि॒णत॑ उपवी॒य॑ दक्षि॑णं बा॒हुमु॒द्धर॑तेऽव॑धत्ते स॒व्यमिति॑ यज्ञोपवी॒तमे॒तदे॑व विप॑रीतं॒ प्राची॑नाऽऽवी॒त॒ꣳ सं॑वीत॑ मानु॒षम् ॥

रक्षा॑ꣳसि ह॒वा पु॒रोऽनु॑वाके॒ तपो॑ऽग्र॒मति॑ष्ठन्त॒ तान्प्र॒जाप॑तिर्वरि॒णोपा॑मन्त्रयत॒ तानि॒ वर॑मवृणीतादि॒त्यो नो॒ योद्धा॒ इति॒ तान्प्र॒जाप॑तिरब्रवी॒द्योध॑यद्ध्वमिति॒ तस्मा॒दुत्ति॑ष्ठन्त॒ꣳ ह॒वा तानि॒ रक्षा॑ꣳस्यादि॒त्यं योध॑यन्ति॒ याव॑दस्त॒मन्व॑गात्तानि॑ ह॒ वा एता॑नि॒ रक्षा॑ꣳसि

गायत्रियाऽभि॑मन्त्रि॒तेनाभ॑सा शाम्यन्ति॒ तदु॒ ह॒ वा एते ब्र॑ह्मवा॒दिनः॑ पू॒र्वाभि॑मुखाः सन्ध्यायाँ॑ गायत्रियाऽभि॑मन्त्रिता आप॑ ऊ॒र्ध्वं वि॒क्षिप॑न्ति॒ ता एता आपो॑ व॒ज्री भू॒त्वा तानि॒ रक्षा॑ꣳसि म॒न्दे॒हारु॑णे द्वी॒पे प्र॑क्षि॒पन्ति॒ यत्प्र॑दक्षि॒णं प्र॒क्रम॑न्ति॒ तेन॑ पा॒प्मान॒मव॑धून्वन्त्यु॒द्यन्त॑मस्तं॒यन्त॑मादि॒त्यम॑भिध्या॒यन्कु॒र्वन्ब्रा॑ह्म॒णो वि॒द्वान्प्स॑क॒लं भ॒द्रम॑श्नु॒तेऽसावा॑दि॒त्यो ब्र॒ह्मेति॒ ब्रह्मै॒व सन्ब्रह्मा॒प्येति॒ य एवं वेद॑ ॥

भोक्तारः -

आ ब्र॑ह्मन्ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒माऽऽस्मि॒न्रा॒ष्ट्रे रा॑जन्य॒ इ॒ष॒व्यॅ॑शू॒रो॑ महार॒थो जा॑यतां॒ दोग्ध्री॑ धे॒नुर्वोढा॑ऽनड्वा॒नाशु॒स्सप्तिः॒ पुर॑न्धि॒र्योषा॑ जि॒ष्णू र॑थे॒ष्ठास्सभे॒यो युवा॒ऽस्य य॑जमानस्य वी॒रो जा॑यतां॒ निका॒मेनि॑कामे नः॒ प॒र्ज॒न्यो॑ वर्षतु॒ फ॒लिन्यो॑ न॒ ओष॑धयः॒ पच्यन्तां॒ योग॑क्षेमो नः॑ कल्पताम् ॥

कि॒ꣳस्वि॑दासीत्पू॒र्वचि॑त्तिः॒ कि॒ꣳस्वि॑दासीद्बृ॒हद्व॑यः॑ । कि॒ꣳस्वि॑दासी त्पिशङ्गि॒ला कि॒ꣳस्वि॑दासीत्पिलिप्पि॒ला । द्यौरा॑सीत्पू॒र्वचि॑त्तिरꣳ आसीद्बृ॒हद्व॑यः॑ । रात्रि॑रासीत्पिशङ्गि॒लाऽवि॑रासीत्पिलिप्पि॒ला । कस्वि॑देकाकी च॑रति॒ क उ॑ स्विज्जायते पुनः॑ । कि॒ꣳस्वि॒द्धिम॑स्य॑ भेष॒जं कि॒ꣳस्वि॑दावप॑नं महत् । सूर्य॑ एकाकी च॑रति॒ चन्द्र॑मा जायते पुनः॑ । अग्नि॒र्हिम॑स्य॑ भेष॒जं भूमि॒रावप॑नं महत् । पृ॒च्छामि॑ त्वा पर॒मन्तं॑ पृथि॒व्याः पृ॒च्छामि॑ त्वा भुव॑नस्य॒ नाभि॑म् । पृ॒च्छामि॑ त्वा वृ॒ष्णो अश्व॑स्य रे॒तः॑ पृ॒च्छामि॑ वा॒चः प॑र॒मं व्यो॑म । वे॒दिमा॑हुः पर॒मन्तं॑ पृथि॒व्या य॒ज्ञमा॑हुर्भुव॑नस्य॒ नाभि॑म् ॥ सोम॑माहुर्वृ॒ष्णो अश्व॑स्य रे॒तो ब्रह्मै॒व वा॒चः प॑र॒मं व्यो॑म ॥

नमस्सहमानाय निव्याधिनं आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायाऽरण्यानां पतये नमो नमस्सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यश्शयानेभ्यश्च वो नमो नमस्स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमस्सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमस्स्वायुधाय च सुधन्वने च नमस्स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमस्सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चाऽऽवट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥

दत्तकालः

कर्ता :- उपवीती -

ओं भूर्भुवस्सुवः। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ देव सवितः प्र सुव ॥

इति प्रदक्षिणं परिषिच्य,

(**विश्वेदेवहस्ते** शुद्धोदकं दत्वा,) पात्रमूले

"पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानाँ त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषाँ क्षेष्ठा अमुत्रामुष्मिन् लोके ॥"
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे" ॥
स्वाहा विष्णो ! हव्यꣳरक्षस्व" ।

".... गोत्रस्य ....शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे पुरूरवार्द्रव संज्ञकाः! विश्वे देवा देवताः! एतद्धो **हव्यं** सव्यञ्जनं सपरिकरं च ब्राह्मणस्तु आहवनीयार्थे गयेयं भूः, गदाधरो भोक्ता, **हव्यं** ब्रह्म, अहं च ब्रह्म, भोक्ता च ब्रह्म, **स्वर्णमयं पात्रं** अक्षयवटच्छायेयं विश्वेभ्यो देवेभ्यः इदं इदं हव्यं अमृतस्वरूपं, आतृप्तेः दत्तं दास्यमानं परिविष्टं परिवेष्यमाणं च **स्वाहा हव्यं** नमः न मम " इति देवतीर्थेन तुळसी गन्ध सहितं यवोदकं पात्रमूले दद्यात् - गदाधरः प्रीयताम् । गयायां अक्षयवटच्छायायां .... क्षेत्रे .... विमानच्छायायां .... नायिका समेत .... श्री... स्वामि सन्निधौ श्री विष्णु पादे दत्तम्। गयायां दत्तम् । विश्वेभ्यो देवेभ्य इदं न मम ॥

प्राचीनावीती - आहुति शिष्टमन्नं पितृभोजनपात्रे निक्षिप्य - दक्षिणामिमुखः सव्यं जान्वाच्य- एष ते तत ! (मातः !) मधुमाꣳ ऊर्मिस्सरꣳस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाग्निरक्षितोनुपदस्त एवं मह्यं पित्रेऽक्षितोनुपदस्तस्वधा (मात्रेऽक्षितोनुपदस्तस्वधा) भव तां त्वꣳ स्वधान्तैस्सहोपजीवर्चस्ते महिमा, एष ते पितामह ! (पितामहि!) मधुमाꣳ ऊर्मिस्सरꣳस्वान् यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथा वायुरक्षितोनुपदस्त एवं मह्यं पितामहायाक्षितोनुपदस्तः (पितामह्यै अक्षितोनुपदस्तः) स्वधा भव तां त्वꣳ स्वधान्तैः सहोपजीव सामानि ते महिमा, एष ते प्रपितामह ! (प्रपितामहि!) मधुमाꣳ ऊर्मिस्सरꣳस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथादित्योऽक्षितोनुपदस्त एवं मह्यं प्रपितामहायाक्षितोनुपदस्तः! (प्रपितामह्यां अक्षितोनुपदस्तः) स्वधा भव तां त्वꣳ स्वधान्तैः सहोपजीव यजूꣳषि ते महिमा ॥

सर्वमन्त्रं अभिमृश्य तिलान् प्रकीर्य - पात्रस्य **अग्रभागे** स्पृष्ट्वा

ओं भूर्भुवस्सुवः। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ देव सवितः प्र सुव ॥ इति अप्रदक्षिणं परिषिच्य, (पितृहस्ते शुद्धोदकं दत्वा,)

"पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् लोके ॥"
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे" ॥

स्वधा विष्णो ! कव्यꣳरक्षस्व" ।

.... गोत्रस्य ....शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य सवरूप अस्मत् पितृपितामहप्रपितामह (मातृपितामहिप्रपितामही)देवताः ! एतद्धः **कव्यं** सव्यञ्जनं सपरिकरं च ब्राह्मणस्तु आहवनीयार्थे गयेयं भूः, गदाधरो भोक्ता, **कव्यं** च ब्रह्म, अहं च ब्रह्म, भोक्ता च ब्रह्म,रजतमयं पात्रं अक्षयवटच्छायेयं पितृपितामहप्रपितामहेभ्यः (मातृपितामहिप्रपितामहीभ्यः) इदं इदं इदं **कव्यं** अमृतस्वरूपं, आतृप्तेः दत्तं दास्यमानं परिविष्टं परिवेष्यमाणं च **स्वधा कव्यं** नमः न मम ।

गयायां अक्षयवटच्छायायां .... क्षेत्रे .... विमानच्छायायां .... नायिका समेत .... श्री... स्वामि सन्निधौ श्री विष्णु पादे दत्तम्। गयायां दत्तम् । पितृपितामहप्रपितामहेभ्यः (मातृपितामहिप्रपितामहीभ्यः) इदं न मम ॥

पात्रस्य **मूलभागे** स्पृष्ट्वा, **उपवीती** - **ओं भूर्भुवस्सुवः। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ देव सवितः प्र सुव ॥**

इति प्रदक्षिणं परिषिच्य, (श्री विष्णु हस्ते शुद्धोदकं दत्वा,)

"पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानाँ त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषाँ क्षेष्ठा अमुत्रामुष्मिन् लोके ॥"

"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳬसुरे" ॥
स्वाहा विष्णो ! अनᳬरक्षस्व"

".... गोत्रस्य ....शर्मणः (.... गोत्रायाः .... नाम्न्याः) मम पितुः (मातुः) प्रत्याब्दिक श्राद्धे श्राद्ध संरक्षक श्री महाविष्णो! एतत्ते **हव्यं** सव्यञ्जनं सपरिकरं च, ब्राह्मणस्तु आहवनीयार्थे गयेयं भूः, गदाधरो भोक्ता, **हव्यं** ब्रह्म, अहं च ब्रह्म, भोक्ता च ब्रह्म,**स्वर्णमयं** पात्रं अक्षयवटच्छायेयं विश्वेभ्यो देवेभ्यः इदं इदं इदं **हव्यं** अमृतस्वरूपं, आतृप्तेः दत्तं दास्यमानं परिविष्टं परिवेष्यमाणं च **स्वाहा हव्यं** नमः न मम" इति देवतीर्थेन तुळसी गन्ध सहितं यवोदकं पात्रमूले दद्यात् - श्री गदाधरः प्रीयताम् ।

गयायां अक्षयवटच्छयायां .... क्षेत्रे .... विमानच्छायायां .... नायिका समेत .... श्री... स्वामि सन्निधौ श्री विष्णु पादे दत्तम्। गयायां दत्तम् । श्री महाविष्णव इदं न मम ॥

समष्टि दत्तम्

प्राचीनावीती - देव पितृमध्ये समष्टि दानार्थं दर्भं दक्षिणाग्रं भुग्नं निधाय, तिलाक्षत तुळसि दलानि गृहीत्वा -

" यज्ञेश्वरो हव्यसमस्तकव्यभोक्ताऽव्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो रक्षांस्यशेषाण्यसुरांश्च सर्वे ॥

एको विष्णुर्महद्भूतं पृथक् भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥"

अनेन पितुः प्रत्याब्दिक श्राद्ध आराधनेन भगवान् सर्वात्मकः - **उपवीती** - विश्वे देव स्वरूपी / **प्राचीनावीती** - वसुरुद्रादित्य स्वरूप अस्मत् पितृपितामहप्रपितामह (मातृपितामहिप्रपितामहि) स्वरूपी / **उपवीती** - श्राद्ध संरक्षक श्री महाविष्णु स्वरूपी / **प्राचीनावीती** - सर्वाकारो भगवान् स देवः श्री जनार्दनः प्रीयताम् ॥ गयायां अक्षयवटच्छायायां .... क्षेत्रे .... स्वामि सन्निधौ श्री विष्णु पादे दत्तं - गयायां दत्तम् ॥

उपवीती - गये गये गये/ अक्षयवटो अक्षयवटो अक्षयवटः ॥

भोक्तारः - अन्तर्यामि निवेदनं कुर्युः ।

परिषेचनं - भगवत् अर्घ्य जलेन

विश्वेदेवस्थाने - ओं भूर्भुवस्सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ देवं सवितः प्र सुव ॥ सत्यं त्वर्तेन परिषिञ्चामि । पुनःशुद्धोदकम् ॥

प्राचीनावीती - पितृस्थाने परिषेचनं - **ओं भूर्भुवस्सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ देवं सवितः प्र सुव ॥ सत्यं त्वर्तेन परिषिञ्चामि । पुनःशुद्धोदकम्॥**

उपवीती - विष्णुस्थाने परिषेचनं - **ओं भूर्भुवस्सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ देवं सवितः प्र सुव ॥ सत्यं त्वर्तेन परिषिञ्चामि । पुनःशुद्धोदकम्॥**

तिलैर्युक्तः अमृतं भवतु - अमृतोपस्तरणमसि -

प्रार्थनावाक्यं - पितृपितामहप्रपितामहाः! (मातृपितामहप्रपितामहाः!) अमृतं भवतु - अमृतोपस्तरणमसि ।

उपकोशे - ब्रह्म संरक्षक महाविष्णो! अमृतं भवतु - अमृतोपस्तरणमसि ।

प्रार्थनावाक्यं - सर्वत्र समकाले अमृतं भवतु - अमृतोपस्तरणमसि स्वाहा ॥

१. प्राणे निर्विष्टोऽमृतं जुहोमि । शिवो मांऽऽविशाऽऽप्रदाहाय ।
प्राणाय स्वाहा ॥ (प्राणाय इदं न मम)

२. अपाने निर्विष्टोऽमृतं जुहोमि । शिवो मांऽऽविशाऽऽप्रदाहाय ।
अपानाय स्वाहा ॥ (अपानाय इदं न मम)

३. व्याने निर्विष्टोऽमृतं जुहोमि । शिवो मांऽऽविशाऽऽप्रदाहाय ।
व्यानाय स्वाहा ॥ (व्यानाय इदं न मम)

४. उदाने निर्विष्टोऽमृतं जुहोमि । शिवो मांऽऽविशाऽऽप्रदाहाय ।
उदानाय स्वाहा ॥ (उदानाय इदं न मम)

५. समाने निर्विष्टोऽमृतं जुहोमि । शिवो मांऽऽविशाऽऽप्रदाहाय ।
समानाय स्वाहा ॥ (समानाय इदं न मम)
ब्रह्मणि म आत्माऽमृतत्वाय ॥ (सर्वत्र हस्तोदकं दत्वा)

इति ब्राह्मणान् आत्मानञ्च सर्वतः, प्रोक्षन्निकानि च रक्षोघ्नान् वैष्णवान्

अन्यांश्च पितृपूक्तानि इतिहासादीन् भवन्तो भुञ्जानम् सावधानं श्रावयिष्ये" - (श्रावय - इति प्रतिवचनं) वसिष्ठ वाल्मीकिवत् पराङ्मुख परकालादिवत् यूयमागताः युष्मदनुगुणं पदार्थाः मया सम्पादिताः, सम्पादितेषु पदार्थेषु भगवन्निवेदितेषु यद्यदभीष्टं तत्तदानाय्य यथा रात्रौ क्षुत्र भवेत् तथा भुक्त्वा वयं संरक्षणीयाः ॥

(१. ओं भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥) (त्रिः)

२. मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माद्ध्वीर्नस्सन्त्वोषधीः॥

३. मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ॥

४. मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माद्ध्वीर्गावो
भवन्तु नः ॥ (ओं मधु मधु मधु ॥)

फलानि, व्यञ्जनं, मधु च परिविष्य

स्वामिनः! यथासुखं जुषध्वम् । कर्ता अनवेक्षमाणः भोजयेत् । (पानार्थं अभिषेक जलं दद्यात्)

अभिश्रवण जपः

१. पुंसूक्तम्(सहस्रशीर्षा), २.अद्भ्यस्संभूतः, ३.सहस्रशीर्षं देवं, ४.ऋतꣳसत्यम्,नारायणाय विद्महे, ५. विष्णोर्नुकं (श्री - भू - नीळा सूक्तानि,) ६.कृणुष्वपाजः, ७.रक्षोहणः

८.सोमाय पितृमते, ९. उशन्तस्त्वा, १०. भक्षे हि, ११.ध्रुवासि, १२. अग्न उदधे, १३.शिरो वा एतत्, १४. असावादित्योऽस्मिन्, १५. सन्ततिर्वा १६. एकविꣳशः, १७. इन्द्रो वृत्रं, १८. वैश्वदेवेन वै, १९. अग्नये देवेभ्यः, २०. उशन्तस्त्वा ... आनो, २१.अयं वाव, २२. उशन् ह वै, २३. तꣳहैतं, २४. यां प्रथमां, २५. ऋचां प्राचीं .... विश्वमेनान् .... ओम् ॥

अन्नसूक्तम्

अहमस्मि प्रथमजा ऋतस्य । पूर्वं देवेभ्यो अमृतस्य नाभिः । यो मा ददाति स इदेव माऽऽवाः । अहमन्नमन्नमदन्तमद्मि । पूर्वमग्नेरपि दहत्यन्नम् । यत्तौ हाऽऽसाते अहमुत्तरेषु । व्यात्तमस्य पशवः सुजन्मम् । पश्यन्ति धीराः प्रचरन्ति पाकाः । जहाम्यन्यं न जहाम्यन्यम् । अहमन्नं वशमिच्चरामि ॥ समानमर्थं पर्येमि भुञ्जत् । कोमामन्नं मनुष्योदयेत । पराके अन्नं निहितं लोक एतत् । विश्वेदेवैः पितृभिर्गुप्तमन्नम् । यदद्यते लुप्यते यत्परोप्यते । शततमी सा तनूर्मे बभूव । महान्तौ चरू संकृद्दुग्धेन पप्रौ । दिवं च पृथ्विं पृथिवीं च साकम् । तत्संपिबन्तो न मिनन्ति वेधसः ।

नैतन्मूयो भवति नो कनीयः ॥ अन्नं प्राणमन्नमपानमाहुः । अन्नं मृत्युं तमु जीवातुमाहुः ॥ अन्नं ब्रह्माणो जरसं वदन्ति । अन्नमाहुः प्रजननं प्रजानाम् । मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति नो सखायम् । केवलाघो भवति केवलादी । अहं मेघस्तनयन्वर्षन्नस्मि । मामदन्त्यहमद्मन्यान् ॥ अहꣳसदमृतो भवामि । मदादित्या अधि सर्वे तपन्ति ॥ ओम् ॥

भोजनान्ते, (अन्नपानादिकं पात्रे परिकल्प्य)''स्वामिनः! भगवन्निवेदितेषु पदार्थेषु किमपेक्षितम्?''(तीर्थं, प्रसादः) इति पृष्ट्वा, ''सर्वं (सकलं) संपूर्णम्'' इत्युक्ते,

कर्ता

(गायत्रीं – ओं भूर्भुवस्सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥) (केचित् जपन्ति)

(मधुत्रयम्)

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माद्ध्वीर्नस्सन्त्वोषधीः ॥
मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माद्ध्वीर्गावो भवन्तु नः ॥
(ओं मधु मधु मधु ॥) इति च जपित्वा -

१. उपवीती - पुरूरवार्द्रवसंज्ञकाः विश्वेदेवाः! (मधु मधु) वस्संपन्नम्? इति पृष्ट्वा, 'अस्तु संपन्नम्' इत्युक्ते, 'विश्वेदेवाः ! तृप्तास्थ ?' इति पृष्ट्वा, 'तृप्तास्स्मः' इति प्रत्युक्ते,

२. प्रचीनावीती - **"अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती । योजान्विंद्र ते हरी ॥** वसुरुद्रादित्यस्वरूप अस्मत् पितृपितामहप्रपितामहाः !(मातृपितामहिप्रपितामह्यः !)

(मधु मधु) वस्संपन्नम् ? इति पृष्ट्वा, **'अस्तु संपन्नम्'** इत्युक्ते, वसुरुद्रादित्यस्वरूप अस्मत् पितृपितामहप्रपितामहाः ! (मातृपितामहिप्रपितामह्यः!) **तृप्तास्थ?'** इति पृष्ट्वा, **'तृप्तास्स्मः'** इति प्रत्युक्ते,

३. **उपवीती** - श्राद्धसंरक्षक श्री महाविष्णो ! **(मधु मधु) ते संपन्नम् ?** इति पृष्ट्वा, **'अस्तु संपन्नम्'** इत्युक्ते, 'श्रीमहाविष्णो! **तृप्तोऽसि?'** इति पृष्ट्वा, **'तृप्तोऽस्मि'** इति प्रत्युक्ते,

प्रकिर क्रमः

पितृदेवयोर्मध्ये **प्राचीनावीती** दक्षिणाग्रं भुग्नं निधाय, **मार्जयन्तां** इति तिलोदकं पितृतीर्थेनोत्सिच्य, भुक्तशेषं अन्नादिके सव्यअनं **अन्नम् द्रवीकृतं** हस्तद्वयेनाऽऽदाय, किञ्चित् कस्मिंश्चित् पात्रे सम्सृज्य जलेन दक्षौ आप्लाव्य

"ये अग्निदग्धा येऽनग्निदग्धा ये वा जाताः कुले मम ।
भूमौ दत्तेन प्रकिरेण तृप्ता यान्तु परां गतिम् ॥

इति प्रकिरेण पितृतीर्थेन प्रकिरेत् ॥

अग्निदग्धेभ्यः अनग्निदग्धेभ्यः अस्मत् कुल प्रसूत मृतेभ्यः अयं प्रकिरः स्वधा नमः, अग्निदग्धाश्च अनग्निदग्धाश्च मार्जयन्ताम् । तदुपरि तिलोदकं विसृज्य, उपवीती, **आचमनं कुर्यात् ॥**

अथवा विकिरक्रमः

विश्वेदेव भुक्ति पात्रस्य पुरतः -

१. असोमपाश्च ये देवा यज्ञभागविवर्जिताः ।
तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम् ॥ पुनःश्शुद्धोदकं ॥

२. प्राचीनावीती -
असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः ।
दास्यामि तेभ्यो विकिरमन्नं तास्यश्च पैतृकम् ॥ पुनःश्शुद्धोदकं ॥

३. उपवीती -

असंशयो भवेद्विष्णुः मोक्षसाधनमव्ययम् ।
पितृणाञ्च वरं श्रेष्ठं विकिराच्च वैष्णवम् ॥ पुनःश्शुद्धोदकं,आचम्य ।

प्राचीनावीती - देवपितृमध्ये दक्षिणाग्रं भुग्नं निधाय, तस्मिन् **मार्जयन्ताम्** इति तिलोदकं पितृतीर्थेन निस्याव्य, पिण्डं गृहित्वा

ये अग्निदग्धा येऽनग्निदग्धा ये वा जाताः कुले मम ।
भूमौ दत्तेन पिण्डेन तृप्ता यान्तु परां गतिम् ॥

अग्निदग्धेभ्यः अनग्निदग्धेभ्यः अस्मत् कुल प्रसूत मृतेभ्यः
अयं पिण्डः स्वधा नमः, अग्निदग्धाश्च अनग्निदग्धाश्च मार्जयन्ताम्।

इति पिण्डोपरि तिलोदकं निनयेत् ॥ उपवीती - आचमनं ॥

प्राचीनावीती - सर्वत्र **अमृताभिधानमसि'** इति भगवत् पाद्य जलेन आपोशनं दद्यात् । प्रकिर पिण्डञ्च **वायसेभ्यो** दद्यात्।

निमन्त्रितेषु आचान्तेषु तेभ्यः भगवदभिषेक तीर्थं एकवारं प्रदाय -

.... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप अस्मत् पितृपितामहप्रपितामहाः ! (मातृपितामहिप्रपितामह्याः !) इदं **वस्तांबूलम्** ,

(उपवीती) इयञ्च **दक्षिणा** ॥

उपवीती - पुरुरवार्द्रव संज्ञक विश्वेदेवाः ! इदं **वस्तांबूलम् ,** इयञ्च **दक्षिणा॥** श्राद्ध संरक्षक महाविष्णो! इदं **वस्तांबूलम्** , इयञ्च **दक्षिणा ॥**

प्राचीनावीती - .... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे वसुरुद्रादित्य स्वरूप अस्मत् पितृपितामहप्रपितामहाः !(मातृपितामहिप्रपितामह्याः!) **अक्षय्यम्** । इति पितृहस्ते जलं दत्वा (अस्त्वक्षय्यम् - इति प्रतिवचनम्)

उपवीती - .... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः(मातुः) प्रत्याब्दिक श्राद्धे **विश्वेदेवाः ! अक्षय्यम्** । (अस्त्वक्षय्यम् - इति प्रतिवचनम्) .... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे **अक्षय्यम्** । श्राद्ध संरक्षक **महाविष्णो** ! अक्षय्यम्। (अस्त्वक्षय्यम् - इति प्रतिवचनम्) अक्षतान् दत्वा -

प्राचीनावीती -

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वन्तृप्ता यात पथिभिर्देवयानैः॥

उपवीती - देवेभ्यो नमः /

प्राचीनावीती -

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ॥

उपवीती - श्राद्ध संरक्षक श्रीमहाविष्णवे नमः ॥ प्रणम्य ।

प्राचीनावीती - '' स्वामिनः! अस्मिन् दिवसे .... गोत्रं ... शर्माणं.... (गोत्रां ....नाम्नीं) पितरमुद्दिश्य (मातरमुद्दिश्य) मया कृतमिदं श्राद्धं, यथोक्तं यथाशास्त्रानुष्ठितं, गयाश्राद्धफलदं, अक्षय्यतृप्तिकरं, भगवत्प्रीणनं च भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु'' इति प्रार्थ्य,

''(यथोक्तमस्तु)यथाशास्त्रानुष्ठितं अस्तु, गयाश्राद्धफलदं अस्तु, अक्षय्यतृप्तिकरं अस्तु, भगवत्प्रीणनमस्तु'' इति प्रत्युक्ते, प्रतिवचनं ।

'अन्नशेषः किं क्रियताम्?' (इति प्रश्नः) । **'इष्टैः सह भुज्यताम्'** (इति प्रत्युक्तिः।)

दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव नः ।
श्रद्धा च नो मा व्यपगात् बहु देयञ्च नोऽस्तु ॥
अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नस्सन्तु मा च याचिष्म कञ्चन ॥

भोक्तारः-

दातारो वोऽभिवर्धन्तां वेदाः सन्ततिरेव वः ।
श्रद्धा च वो मा व्यपगात् बहु देयञ्च वोऽस्तु ।।
अन्नञ्च वो बहु भवेदतिथींश्च लभध्वम् ।
याचितारश्च वस्सन्तु मा च याचध्वं कञ्चन ।। (इति प्रत्युक्ते)

ॐ स्वधा इति कस्मिंश्चित् पात्रे तिलोदकं गृहीत्वा, दक्षिणाभिमुखः सव्यं जान्वाच्य पितुर्वामभागे पितृतीर्थेन न्युब्जेच

स्वादुष्सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः । चित्रसेना इषुबला अमृद्ध्रास्सतोवीरा उरवो व्रातसाहाः । ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत । सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता । यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ।।

अक्षय्यम् इति स्वधा पात्रं प्रोक्ष्य, उत्तानं कुर्यात् । (अस्त्वक्षय्यम् इति प्रतिवचनम् ।)

अष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवावरुन्धे षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान् पितॄन् प्रीणाति ।।

इत्युपस्थाय - उपवीती - कर्ता बन्धुभिस्सह प्रणमेत् ।

आशीर्वचनं

भोक्तारः - अग्निरायुष्मान्थ्स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि सोम आयुष्मान्थ्स ओषधीभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि यज्ञ आयुष्मान्थ्स दक्षिणाभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमिब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ।।

इति आशीर्वचने कृते, श्रीपादतीर्थं ग्रहणम्, तदर्थं दक्षिणा दानम्

१. प्राचीनावीती - 'उत्तिष्ठत पितृपितामहप्रपितामहाः!' (मातृपितामहिप्रपितामह्यः!)

२. उपवीती - 'उत्तिष्ठत विश्वे देवाः!'

३. उत्तिष्ठ विष्णो!'(इति उत्थापयेत्)

प्राचीनावीती -

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर्देवयानैः ।।

उपवीती -(ब्राह्मणान् कनिष्ठ पूर्वं प्रदक्षिणम् कृत्वा,)

पत्रशाकादि दानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशजातं चित्तेषु विस्मृत्य क्षन्तुमर्हथ ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः!
श्राद्धं संपूर्णतां यातु प्रसादात् भवतां मम ।।

अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात् ।
अद्य मे वंशजाः सर्वे याता वोऽनुग्रहात् दिवम् ॥
धन्या वयं भवत्पादरजः पूतमिदं गृहम् ।
अनुग्रहश्च युष्माभिः कृतोऽस्मासु दयालुभिः ॥ इति उपचारवचनपूर्वकं प्रदक्षिणम् । आद्वारं अनुव्रजेत् । द्वारे उत्तरीयं संस्तीर्य - (ब्राह्मण पाद स्पर्शन वस्त्रं शिरसि क्षणं धारयेत्)

(पिता पितामहश्चैव तथैव प्रपितामहाः । मम तृप्तिं प्रयान्त्वद्य विप्रदेहेषु संस्थिताः ॥) इति अत्र केचित् पठन्ति ।

विसृष्टाश्च ब्राह्मणाः,

वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ (इति सूर्यं पश्यन् मन्त्रं जपेयुः)

पिण्ड प्रदानार्थं सङ्कल्पः (षट्पिण्डाः)

प्राणानायम्य, प्राचीनावीति .... "श्री गोविन्द गोविन्द गोविन्द .... गोत्रस्य .... शर्मणः (.... गोत्रायाः .... नाम्न्याः) पितुः (मातुः) प्रत्याब्दिक श्राद्धे पितृणां अक्षय्य तृप्त्यर्थं पिण्ड प्रदानं करिष्ये" इति सङ्कल्प्य /

अग्रेदक्षिणतः द्वेधा दक्षिणाग्रान् दर्भान् संस्तीर्य,

पूर्वेषु दर्भेषु - १. मार्जयन्तां मम पितरौ मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहाः ॥ इति दक्षिणापवर्गं तिलोदकं निनीय ।

पश्चिमेषु दर्भेषु -

२. मार्जयन्तां मम मातरौ मार्जयन्तां मम पितामह्यौ मार्जयन्तां मम प्रपितामह्यः॥ इति दक्षिणापवर्गं तिलोदकं निनीय ।

पूर्व दर्भेषु

एतत्ते तत! ...गोत्र! ....शर्मन् ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'ये च त्वामनु'**) । (इति पिण्डमूले लेपं निर्मृज्य,)

एतत्ते पितामह! ...गोत्र! ...शर्मन् ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'ये च त्वामनु'**) । (इति पिण्डमूले लेपं निर्मृज्य,)

एतत्ते प्रपितामह! ...गोत्र! ...शर्मन् ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'ये च त्वामनु'**) । इति पिण्डमूले लेपं निर्मृज्य,)

पश्चिम दर्भेषु

एतत्ते मातः! ...गोत्रे!.... (नाम्नि) दे ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'याश्च त्वामनु'**) । (इति पिण्डमूले लेपं निर्मृज्य,)

एतत्ते पितामहि! ...गोत्रे!.... (नाम्नि) दे ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'याश्च त्वामनु'**) । (इति पिण्डमूले लेपं निर्मृज्य,)

एतत्ते प्रपितामहि! ...गोत्रे!... (नाम्नि) दे ! (इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,) (**'याश्च त्वामनु'**) । (इति पिण्डमूले लेपं निर्मृज्य,)

गन्धपुष्पधूपदीपादिभिरभ्यर्च्य, भक्ष्यभोज्यफलादिकं पक्वापक्वं सर्वं, पिण्डदेवताभ्यो निवेद्य, पिण्डपात्रे, तिलोदकमभिपूर्य तेन,

पूर्वेषु दर्भेषु

१. **मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहाः ॥**

इत्यादिक्रमेण **त्रिः** पूर्ववत् निनीय्य,

पश्चिमेषु दर्भेषु

२. **मार्जयन्तां मम मातरो मार्जयन्तां मम पितामह्यो मार्जयन्तां मम प्रपितामह्यः॥** इत्यादिक्रमेण **त्रिः** पूर्ववत् निनीय्य,

१. **"ये च वोऽत्र ये चास्मास्वाशꣳसन्ते"** इति पितृपिण्डान्
२. **"याश्च वोऽत्र याश्चास्मास्वाशꣳसन्ते"** इति मातृपिण्डान्

१. **"ते चं वहन्तां "** इति पितृपिण्डान्
२. **"ताश्चं वहन्तां "** इति मातृपिण्डान्
१. **"तृप्यन्तु भवन्तः"** इति पितृ पिण्डान्
२. **"तृप्यन्तु भवत्यः"** इति मातृपिण्डान्

"तृप्यत तृप्यत तृप्यत ॥" इति उभयांश्च उपस्थाय

प्रोक्षणी पात्रं तिलोदक पूर्णं दक्षिणहस्ते निधाय, वामहस्तेन पिधाय, पितृ तीर्थेन प्रपितामही पिण्डमारभ्य,

पुत्रान्पौत्रान्नभि तर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयाꣳस्तर्पयन्तु ॥

इति त्रिः अग्रदक्षिणं पिण्डोपरि सन्तत धारया जलं निधाय, तत्पात्रं पिण्डस्य दक्षिणतः न्युब्जच, इतराणि दर्व्यादि पात्राणि **तृप्यत तृप्यत तृप्यत** इति अनुश्वासं उच्चरन् न्युब्जच दक्षिण हस्तस्थं पात्रं तत्पात्रं पिण्डोत्तरतो निधाय, अद्भिरापूर्य, तेन जलेन इतराणि प्रोक्ष्य द्वन्द्वं अभ्युदाहृत्य अन्नादिकं पिण्ड पितृ देवताभ्यो निवेद्य, तस्मिन् ग्रासावरार्ध्यं **प्राणे निविष्टोऽमृतं जुहोमि। ब्रह्मणि म आत्माऽमृतत्वाय ॥**

इति प्राश्योपवीती*- आचम्य

प्राचीनावीती - पिण्डान् . पितृपितामहप्रपितामहेभ्यो नमः, यथास्थानं प्रतिष्ठापयामि इति उत्थापयेत् ॥ ततः पिण्डान् ब्रह्मचारिणे, गोभ्यो वा दद्यात् ।

एवं श्राद्धं कृत्वा, आचम्य, सात्विकत्यागं कृत्वा, आत्म समारोपणं वा समित्समारोपणं (पु - 41)कृत्वा, अग्निं यथायोगं सम्प्रक्षेत् । उक्तनियमादियुक्तः स्थित्वा, **परेऽहनि पितृवर्गस्यैव श्राद्धाङ्गतर्पणं** कुर्यात् ॥ (पु - 58) भागः - १ / उपस्थानं (पु - 64) ॥

इति पार्वण श्राद्धप्रयोगः ॥

* एकादश्यादि अन्नभोजन निषिद्ध दिनेषु आघ्राणम् ।

** पुत्रकामनायां मध्यपिण्डं ***'आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत्'।** (शु.य. २-३३) (पुरुषः स्यात् - इति छन्दोगाः)

इति मन्त्रेण, अरोगिण्यै पुत्रजननयोग्यायै दद्यात् ॥ सा प्राश्नीयात् ।

*(आत्मसमारोपणम्)

(या ते अग्ने यज्ञिया तनूस्तयेहारोहोत्मात्मानम् ।
अच्छा वसूनि कृण्वन्नसमे नर्या पुरूणि ।
यज्ञो भूत्वा यज्ञमासीद स्वां योनिम् ।
जातवेदो भुव आ जायमानस्साक्षय एहि ।) इति **आत्मनि** समारोपयेत् ॥

* अग्नौ आत्म समारूढं काष्ठात् प्रक्षेपः

''उपावरोह जातवेदः पुनस्त्वम् । देवेभ्यो हव्यं वह नः प्रजानन् ।
आयुः प्रजाꣳरयिमस्मासु धेहि । अर्जस्रो दीदिहि नो दुरोणे ॥''

** (समित्समारोपणम्)

'अयं ते योनिर्ऋत्वियः । यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह । अथा नो वर्धया रयिम् ॥' इत्यग्निं **समिधि** आरोपयेत् ॥

** अग्नौ समित् प्रक्षेपः

''आजुह्वानस्सुप्रतीकः पुरस्तादग्ने स्वां योनिमा सीद साध्या ।
अस्मिन्यज्ञधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥

उदग्ने तिष्ठ प्रत्या तनुष्वन्यमिष्टापूर्ते सꣳसृजेथामयञ्च ।
पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाताꣳसीत् त्वयि तन्तुमेतम् ॥''

श्रीः

॥ अग्निसन्धानप्रयोगः ॥

पादौ प्रक्षाळ्य, द्विराचम्य, सपवित्रपाणिः दक्षिणातांबूलशोभनाक्षतान् गृहीत्वा,

''ओं नमस्सदसे । नमस्सदसस्पतये । नमः सखीनां पुरोगाणां चक्षुषे । नमो दिवे । नमः पृथिव्यै ॥ सप्रथ सभां मे गोपाय । ये च सभ्याꣳसभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् ॥ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः'' - प्रणम्य - ''स्वामिनः! भवत्पादमूले मया समर्पिताम् इमां सौवर्णीं यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य, आवयोः विच्छिन्न-औपासन-अग्निसन्धानं कर्तुं योग्यतासिद्धिरस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ।'' ('तथाऽस्तु । योग्यतासिद्धिरस्तु' ।) दर्भेष्वासीनः दर्भान् धारयमाणः, पवित्रपाणिः त्रिः प्राणान् आयम्य, 'श्रीमान् ... सदा हृदि । 'गुरुभ्यः ... जगतां पती ।' 'स्वशेष... प्रक्रमते स्वयम् । शुक्लाम्बर ... विष्वक्सेनं तमाश्रये' । हरिरोन्तत् (सत्) श्री गोविन्द, ... अस्यां .. शुभतिथौ श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं (श्रीमन् नाराया‍ण प्रीत्यर्थं) आवयोः विच्छिन्नौपासनाग्निसन्धानं करिष्ये , पत्न्यर्थं पुनः प्राणानायम्य, 'आवयोः औपासनाग्निमाधास्ये - विच्छिन्नसन्धानार्थं' इति सङ्कल्प्य, कृतश्च' इत्यनुसन्धाय, सात्त्विकत्यागं कृत्वा, स्थण्डिलं कलपयित्वा

प्राचीः पूर्वमुदक्सꣳस्थं दक्षिणारम्भमालिखेत् ।
अथोदीचीः पुरःसꣳस्थं पश्चिमारम्भमालिखेत् ।

अवाक्करोभ्युक्ष्य, तृणं नैर्ऋत्यां निरस्य, अप उपस्पृश्य, भूर्भुवस्सुरोमिति अग्निं प्रतिष्ठाप्य, निधाय वह्निं, उत्सृज्यते अवोक्षणतोयं, प्राक्तोयं अन्यत् निधाय, उदग्वा, यथा बहिस्स्याच्च परिस्तराणाम् । अग्निमिध्वा, परिस्तीर्य, अग्नेरुत्तरतः दर्भान् संस्तीर्य - दक्षिणान् उत्तरान्, उत्तरान् अधरान् कुर्यात् ।

दर्वी, आज्यस्थाली, प्रोक्षणीं इतरदर्वीच द्वन्द्वं न्यञ्चि सादयित्वा, आयामतः परीमाणं, प्रोक्षणी सꣳस्कारः, पात्रप्रोक्ष इति उत्तानानि पात्राणि त्रिः प्रोक्ष्य, प्रोक्षणीपात्रे अन्यजलं पूरयित्वा, दक्षिणत उद्वास्य, पवित्रमादाय, आज्यस्थाल्यां निधाय, आज्यस्थाल्यां आज्यं निरूप्य, उदीचः अङ्गारान् निरूह्य, तेष्वधिश्रित्य, ज्वलता तृणेन अवद्योत्य, द्वे दभार्ग्रे प्रच्छिद्य, प्रक्षाळ्य, प्रत्यस्य, त्रिः पर्याग्नि कृत्वा, उदगुद्वास्य, अङ्गारान् अग्नौ प्रत्यूह्य, उदगग्राभ्यां पवित्राभ्यां **पुनराहारं** आज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य, प्रागग्रं अग्नौ प्रहरति। येन जुहोति, तदग्नौ प्रतितप्य, दर्भैः संमृज्य, प्रतितप्य, प्रोक्षय, निधाय, दर्भान् अद्भिः संस्पृश्य अग्नौ प्रहरति ।

'ओं अदितेऽनुमन्यस्व' (इति दक्षिणतः प्राचीनम्,)
'ओं अनुमतेऽनुमन्यस्व' (इति पश्चिमादुदीचीनम्)
'ओं सरस्वतेऽनुमन्यस्व' (इति उत्तरतः प्राचीनम्)
'ओं देव सवितः प्र सुव' (इति परिषिच्य)

प्रधानदर्व्या चतुर्गृहीतेन आज्येन,

''ओं भूर्भुवस्सुवस्स्वाहा'' (प्रजापतय इदं न मम)

प्राणानायम्य, ''श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं (श्रीमन् नारायणप्रीत्यर्थं) अग्न्यनुगति* प्रायश्चितार्थं 'अयाश्च' इत्यादि होमं करिष्ये'' इति संकल्प्य,

(१) ओं अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि । अयसा मनसा घृतोऽयसा हव्यमूहिषेऽयानो धेहि भेषजꣳस्वाहा ॥ (अग्नये अयस इदं न मम)

(२) ओं पुनस्त्वाऽऽदित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामास्स्वाहा ॥ (अग्नये वसुनीथाय)

(३) ओं मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳसमिमं दधातु । या इष्टा उषसो निम्रुचश्च तास्सन्दधामि हविषा घृतेन स्वाहा ॥ (मनसे ज्योतिषे इदं न मम)

(४) ओं यन्मे आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिस्स्वाहा ॥ (अग्नये जातवेदसे इदं न मम)

(५) ओं पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पतिः । पुनर्मे अश्विनायुवं चक्षुरधत्तमक्ष्योस्स्वाहा॥ (अग्नीन्द्राबृहस्पत्यश्विभ्य इदं न मम)

(६) तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् । अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनꣳस्वाहा ॥ (अग्नये तन्तुमत इदं न मम ॥)

प्राणानायम्य, 'श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं (श्रीमन् नारायणप्रीत्यर्थं) विच्छिन्न औपासन अग्निसन्धानहोमकर्मणि मध्ये संभावित मन्त्रतन्त्र स्वरवर्ण विधि विपर्यास न्यूनातिरिक्त प्रायश्चित्तार्थं **सर्वप्रायश्चित्ताहुती**र्होष्यामि; प्राणायामञ्च करिष्ये' इति सङ्कल्प्य,

* अनुगतिः = नाशः

अवाक्करोभ्युक्ष्य, तृणं नैर्ऋत्यां निरस्य, अप उपस्पृश्य, भूर्भुवस्स्वरोमिति अग्निं प्रतिष्ठाप्य, निधाय वह्निं, उत्सृज्यते अवोक्षणतोयं, प्राक्तोयं अन्यत् निधाय, उदग्वा, यथा बहिस्स्याच्च परिस्तराणाम् । अग्निमिध्वा, परिस्तीर्य, अग्नेरुत्तरतः दर्भान् संस्तीर्य - दक्षिणान् उत्तरान्, उत्तरान् अधरान् कुर्यात् ।

दर्वीं, आज्यस्थालीं, प्रोक्षणीं इतरदर्वीच द्वन्द्वं न्यञ्चि सादयित्वा, आयामतः परीमाणं, प्रोक्षणी सꣳस्कारः, पात्रप्रोक्ष इति उत्तानानि पात्राणि त्रिः प्रोक्ष्य, प्रोक्षणीपात्रे अन्यजलं पूरयित्वा, दक्षिणत उद्वास्य, पवित्रमादाय, आज्यस्थाल्यां निधाय, आज्यस्थाल्यां आज्यं निरूप्य, उदीचः अङ्गारान् निरूह्य, तेष्वधिश्रित्य, ज्वलता तृणेन अवद्योत्य, द्वे दर्भाग्रे प्रच्छिद्य, प्रक्षाळ्य, प्रत्यस्य, त्रिः पर्यग्नि कृत्वा, उदगुद्वास्य, अङ्गारान् अग्नौ प्रत्यूह्य, उदगग्राभ्यां पवित्राभ्यां **पुनराहारं** आज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य, प्रागग्रं अग्नौ प्रहरति। येन जुहोति, तदग्नौ प्रतितप्य, दर्भैः संमृज्य, प्रतितप्य, प्रोक्षय, निधाय, दर्भान् अद्भिः संस्पृश्य अग्नौ प्रहरति ।

'ओं अदितेऽनुमन्यस्व' (इति दक्षिणतः प्राचीनम्,)
'ओं अनुमतेऽनुमन्यस्व' (इति पश्चिमादुदीचीनम्)
'ओं सरस्वतेऽनुमन्यस्व' (इति उत्तरतः प्राचीनम्)
'ओं देव सवितः प्र सुव' (इति परिषिच्य)

प्रधानदर्व्या चतुर्गृहीतेन आज्येन,

''**ओं भूर्भुवस्सुवस्स्वाहा**'' (प्रजापतय इदं न मम)

प्राणानायम्य, ''श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं (श्रीमन् नारायणप्रीत्यर्थं) अग्न्यनुगति* प्रायश्चितार्थं 'अयाश्च' इत्यादि होमं करिष्ये'' इति संकल्प्य,

(१) ओं अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि । अयंसा मनसा धृतोऽयसा हव्यमूहिषेऽयानो धेहि भेषजꣳस्वाहा ।। (अग्नये अयस इदं न मम)

(२) ओं पुनस्त्वाऽऽदित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामास्स्वाहा ।। (अग्नये वसुनीथाय)

(३) ओं मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳसमिमं दधातु । या इष्टा उषसो निम्रुचश्च तास्सन्दधामि हविषा घृतेन स्वाहा ।। (मनसे ज्योतिषे इदं न मम)

(४) ओं यन्मे आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिस्स्वाहा ।।
(अग्नये जातवेदसे इदं न मम)

(५) ओं पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पतिः । पुनर्मे अश्विनायुवं चक्षुराधत्तमक्ष्योस्स्वाहा।।
(अग्नीन्द्राबृहस्पत्यश्विभ्य इदं न मम)

(६) तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् । अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनꣳस्वाहा ।। (अग्नये तन्तुमत इदं न मम ।।)

प्राणानायम्य, 'श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं (श्रीमन् नारायणप्रीत्यर्थं) विच्छिन्न औपासन अग्निसन्धानहोमकर्मणि मध्ये संभावित मन्त्रतन्त्र स्वरवर्ण विधि विपर्यास न्यूनातिरिक्त प्रायश्चित्तार्थं **सर्वप्रायश्चित्ताहुती**र्होष्यामि; प्राणायामञ्च करिष्ये' इति सङ्कल्प्य,

* अनुगतिः = नाशः

ओं भूर्भुवस्सुवस्स्वाहा॑ ।। (प्रजापतय इदं न मम) ।। १ ।।

ओं अना॑ज्ञातं यदाज्ञा॑तम् । य॒ज्ञस्य॑ क्रि॒यते॑ मिथु॑ । अग्ने॒ तद॑स्य कल्पय । त्वꣳहि वेत्थ॑ यथात॒थꣳ स्वाहा॑ ।। (अग्नय इदं) ।। २।।

ओं पुरु॑षसम्मितो य॒ज्ञः । य॒ज्ञः पुरु॑षसम्मितः । अग्ने॒ तद॑स्य कल्पय । त्वꣳहि वेत्थ॑ यथात॒थꣳ स्वाहा॑ ।। (अग्नय इदं न मम) ।। ३ ।।

ओं यत्पाकत्रा॑ मन॑सा दी॒नद॑क्षा॒ न । य॒ज्ञस्य॑ मन्व॒ते॒ मर्तासः । अग्निष्टद्धोता॑ क्रतु॒विद्वि॑जानन् । यजि॑ष्ठो॒ देवाꣳ ऋ॑तु॒शो॒ यजा॑ति॒ स्वाहा॑ ।। (अग्नय इदं न मम) ।। ४ ।।

ओं त्वन्नो॑ अग्ने॒ वरु॑णस्य विद्वान्दे॒वस्य॒ हेडो॑ऽव॑ यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तमꣳशोशु॒चानो॒ विश्वा॒ द्वेषाꣳ॑सि॒ प्रमु॑मुग्ध्य॒स्मत् स्वाहा॑ ।। (अग्नीवरुणाभ्यां इदं न मम) ।। ५ ।।

ओं सत्वन्नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ । अव॑ यक्ष्वनो॒ वरु॑णꣳ॒ ररा॑णो वी॒हि मृ॑ळी॒कꣳ सु॒हवो॑ न एधि॒ स्वाहा॑ ।। (अग्नीवरुणाभ्यां इदं न मम) ।। ६ ।।

आ॒भिर्गी॒भिर्य॑दतो॑ न उ॒नम् । आप्या॑य॒य हरिवो॒ वर्धमानः । यदा स्तो॒तृभ्यो॒ महि॑ गो॒त्रा रु॒जासि॑ । भूयि॑ष्ठभाजो॒ अध॑ ते स्याम॒ स्वाहा॑ । (इन्द्राय हरिवत इदं न मम) ।। ७ ।।

इ॒दं विष्णु॒र्वि च॑क्रमे त्रे॒धा नि॒द॑धे॒ पद॑म् । समू॑ढमस्य पाꣳसु॒रे स्वाहा॑ ।। (विष्णव इदं न मम) ।। ।। ८ ।।

ओं भूस्स्वाहा॑ ।। (अग्नय इदं न मम) ।। ९ ।।

ओं भुव॒स्स्वाहा॑ ।। (वायव इदं न मम) ।। १० ।।

ओꣳ सु॒व॒स्स्वाहा॑ ।। (सूर्याय इदं न मम) ।। ११ ।।

ओं भूर्भुव॒स्सु॒व॒स्स्वाहा॑ ।। (प्रजापतय इदं न मम) ।। १२।।

ओं विष्ण॑वे॒ स्वाहा॑ ।। (विष्णवे परमात्मन इदं न मम) ।। १३ ।।

ओं अदि॒तेऽन्व॑मꣳस्थाः । ओं अनु॑मते॒न्व॑मꣳस्थाः ।
ओं सर॑स्व॒तेन्व॑मꣳस्थाः । ओं देव॑ सवितः॒ प्रासा॑वीः ।। इति परिषिच्य

पुनः प्राणानायम्य 'श्रीभगवदाज्ञया .... प्रीत्यर्थं अनेककाल**सायंप्रातराहुतीनां** अकरणप्रायश्चित्तार्थं **प्राजापत्यकृच्छ्रप्रतिनिधि** यत्किञ्चिद्धिरण्यदानं करिष्ये'– इति संकल्प्य, ''हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदं अदश्शान्तिं प्रयच्छ मे ।।'' 'इदं अनेककालसायंप्रातराहुतीनां अकरणप्रायश्चित्तार्थं प्राजापत्यकृच्छ्रप्रतिनिधि यत्किञ्चिद्धिरण्यं नानागोत्रेभ्यः श्रीवैष्णवेभ्यः संप्रददे (नमः) न मम' ।

पुनः प्राणानायम्य 'श्रीभगवदाज्ञया .... प्रीत्यर्थं अनेकाल **दर्शपूर्णमास, स्थालीपाक** अकरण प्रायश्चित्तार्थं आज्यसहितहोमद्रव्यतण्डुलदानं करिष्ये' (इति संकल्प्य,) ''तण्डुला वैश्वदेवत्याः पाकेनान्नं पचन्ति ये । तस्मात् तण्डुलदानेन अदश्शान्तिं प्रयच्छ मे ।।''

'इदं अनेककाल दर्शपूर्णमास स्थालीपाक अकरणप्रायश्चित्तार्थं आज्यसहितहोमद्रव्यं तण्डुलं यस्मै कस्मै श्रोत्रियाय श्रीवैष्णवाय संप्रददे (नमः) न मम' इति दद्यात् ॥

'भगवानेव... विच्छिन्नौपासनाग्निसन्धानाख्यं कर्म... कारितवान्' इति सात्विकत्यागं कृत्वा, 'कृतञ्च करिष्यामि..... प्रीयतां वासुदेवः' इति कृतं कर्म भगवति समर्पयेत् ॥

(अग्निसंधानप्रयोगः समाप्तः)

औपासनहोमः

प्राणानायम्य, श्री भगवदाज्ञया.... प्रीत्यर्थं **पूर्वेद्युः सायमौपासन** होमं,अद्य **प्रातरौपासन** होमञ्च होष्यामि । अञ्जलिं बध्वा, ''चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस उ गर्भे अन्तः । स विजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥''

प्राङ्मुखो देव! अग्ने! अभिमुखो भव । इति अग्निं प्रार्थ्य,

'ओं अग्नये नमः, ओं जातवेदसे नमः, ओं सहोजसे नमः, ओं अजिराप्रभवे नमः, ओं वैश्वानराय नमः, ओं नर्यापसे नमः, ओं पङ्क्तिराधसे नमः, ओं विसर्पिणे नमः' इति प्रागादि अष्टसु दिक्षु अक्षतैस्संपूज्य, **'ओं यज्ञपुरुषाय नमः'**, **'सर्वेभ्यः श्रीवैष्णवेभ्यो नमः'** इत्यक्षतैरभ्यर्च्य, अग्निं परिषिच्य,

'ओं अदितेऽनुमन्यस्व' (इति दक्षिणतः प्राचीनम्,)

'ओं अनुमतेऽनुमन्यस्व' (इति पश्चिमादुदीचीनम्)

'ओं सरस्वतेऽनुमन्यस्व' (इति उत्तरतः प्राचीनम्)

'ओं देव सवितः प्र सुव' (इति परिषिच्य)

होष्यामि, पत्नीहस्तं प्रोक्ष्य, तण्डुलं प्रदाय, पुनः प्रोक्ष्य, अर्धांशं गृहीत्वा, अग्निमध्ये **ओम् अग्नये स्वाहा** (अग्नय इदं न मम)

ओम् अग्नयै स्विष्टकृते स्वाहा (अग्नय स्विष्टकृत इदं न मम)

एकाऽसमिधमादाय - अन्यत् अर्धांशं गृहीत्वा, विभज्य, अग्निमध्ये

सूर्याय स्वाहा (सूर्याय इदं न मम) ओम् **अग्नये स्विष्टकृते स्वाहा**

(अग्नय स्विष्टकृत इदं न मम) एकाऽसमिधमादाय

आहुति संसर्ग प्रायश्चित्तार्थं वनस्पति होमं करिष्ये ।

"यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय"

इति समिधमाधाय, (वनस्पतय इदं न मम) इत्युक्त्वा,

ओं अदितेऽन्वंमऽस्थाः । ओं अनुमतेन्वंमऽस्थाः ।

ओं सरस्वतेन्वंमऽस्थाः । ओं देव सवितः प्रासावीः ।।

'ओं श्रीविष्णवे स्वाहा' इति एकया समिधा दर्भद्वयेन वा पूर्णाहुतिं हुत्वा,

'श्रीविष्णवे परमात्मन इदं न मम । तण्डुले शृते सति उत्थाय,

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ।।

ओं अग्नये नमः, 'मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते । प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ।।' इति प्रणम्य, अभिवाद्य, आचम्य,

'भगवानेव ... औपासनाख्यं कर्म .. कारितवान्' इति सात्विकत्यागं कृत्वा, 'कृतश्च करिष्यामि .... प्रीयतां वासुदेवः' इति औपासनं भगवति समर्पयेत् ।। अथाऽऽत्मसमारोपणं, समित्समारोपणं वा पूर्वोक्तमन्त्रतः कुर्यात् ।। (पु - 41)

।। समिदाधानम् ।। ब्रह्मचारिकार्यम् ।

पादौ प्रक्षाळ्य, आचम्य, पवित्रपाणिः प्राणानायम्य, श्रीमान् ... श्रीगोविन्द.... श्रीभगवदाज्ञया...प्रीत्यर्थं प्रातस्समिध आधास्यामि - इति सङ्कल्प्य

परि त्वाऽग्ने परिमृजाम्यायुषा च धनेन च । सुप्रजाः प्रजया भूयास्ꣳ सुवीरो वीरैस्सुवर्चा वर्चसा सुपोषः पोषैस्सुगृहो गृहैस्सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः ।। इति अग्निं प्रार्थ्य -

स्थण्डिलं कल्पयित्वा, "प्राचीः पूर्वमुदक्सऽस्थं दक्षिणारंभमालिखेत् । अयोदीचीः पुरस्सऽस्थं पश्चिमारंभमालिखेत् ।" अवाक्करोभ्युक्ष्य, तृणं नैर्ऋत्यां निरस्य, अप उपस्पृश्य, भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य, निधाय वह्निम्,उत्सृज्यते अवोक्षणतोयशेषं, प्राक्तोयमन्यत्, निदधात्युदग्वा यथा बहिस्स्याच्च परिस्तराणाम्। अग्निमिध्वा, प्रागग्रैरुदगग्रैश्च दर्भैः परिस्तीर्य,

ओमं अदितेऽनुमन्यस्व । अनुमतेनुमन्यस्व । सरस्वतेऽनुमन्यस्व । देव सवितः प्र सुव ।। इति परिषिच्य । समिधा दर्भेण वा अग्नौ जहुयात् ।

१. ओं अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिद्धयस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ।।

२. एधोऽस्येधिषीमहि स्वाहा ।। ३. समिदसि समेधिषीमहि स्वाहा ।।

४. तेजोऽसि तेजो मयि धेहि स्वाहा ।।

५. अग्नै अथर्वन्वरिष्ठ रस्तेन सꣳसृज्महि । पर्यस्वाꣳ अग्न आगमन्तं मा सꣳसृज वर्चसा स्वाहा ॥ ६. सं माऽग्ने वर्चसा सृज प्रजया च धनेन च स्वाहा ॥ ७. विद्युन्मे अस्य देवा इन्द्रो विद्यात्सहऋषिभिस्वाहा ॥ ८. अग्नये बृहते नाकायꣳ स्वाहा ॥ ९. द्यावापृथिवीभ्याꣳ स्वाहा ॥ १०. एषा ते अग्ने समित्तया वर्द्धस्व चाप्यायस्व च तयाऽहं वर्द्धनेनो भूयासमाप्यायमानश्च स्वाहा ॥ ११. यो माऽग्ने भागिनꣳ सन्तमथाभागं चिकीर्षति । अभागमग्ने तꣳ कुरु मामग्ने भागिनं कुरु स्वाहा ॥ १२. समिधमाधायाग्ने सर्वव्रतो भूयासꣳ स्वाहा ॥

ओं अदितेऽन्वंमꣳस्थाः । अनुमतेऽन्वंमꣳस्थाः । सरस्वतेऽन्वंमꣳस्थाः । देवं सवितः प्रासावीः ॥ ओं विष्णवे स्वाहा । श्री विष्णवे परमात्मन इदं न मम॥

॥ उपस्थानम् ॥

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् ।
यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् ।
यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासम् ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ।
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु ।
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

अग्नये नगः, मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

प्रणम्य, अभिवाद्य, आचामेत् ॥

श्रीः

पुण्याहवाचनक्रमः

पादौ प्रक्षाळ्य, आचम्य, पवित्रपाणिः, प्रणवव्याहृतिभिरद्भिः, कूर्च आम्रपल्लवादिभिरलंकृत्य, शुद्धभूमौ, कदळ्यादिदले तण्डुलं निक्षिप्य, तदुपरि दर्भद्वयं निक्षिप्य, कुम्भं निधाय, प्रणवव्याहृतिभिरद्भिः पूरयित्वा, कूर्च आम्रपल्लवादिभिरलंकृत्य, प्राणानायम्य, श्रीगोविन्द ... (अस्यां) शुभतिथौ श्रीभगवदाज्ञया भगवत् (श्रीमन्नारायण) प्रीत्यर्थं शरीरशुद्ध्यर्थं,आत्मशुद्ध्यर्थं, सर्वोपकरणशुद्ध्यर्थं, गृहशुद्ध्यर्थं, कूपशुद्ध्यर्थं, भाण्डशुद्ध्यर्थं, शुद्धिपुण्याहं वाचयिष्ये - इति संकल्प्य, साक्षततीर्थं भूमौ निस्राव्य, 'दक्षिणकरतलेन कुम्भं समालभ्य,'पुण्याहे चतुरो ब्राह्मणान् तोषयिष्ये' ब्राह्मणान् हिरण्येन तोषयेत् ॥